Answer script submission email id
scm.sans.am@gmail.com

**WEST BENGAL STATE UNIVERSITY**
B.A. Honours 2nd Semester Examination, 2022

# SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## SECTION-A

1. यथाभिमतं कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) तारापीडस्य मन्त्री कः आसीत् ? मन्त्रिणः उपदेशाः संक्षेपेण आलोचनीयाः। 2+8

(ख) 'वाणोच्छिष्टं जगत् सर्वम्' – वचनस्यास्य तात्पर्य्यं शुकनासोपदेशमाधारीकृत्य निरुपयत। 10

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्। 5×3 = 15

(क) गुरुपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानमनुपजातपलितादिवैरुप्यमजरं वृद्धत्वमनारोपितमेदोदोषं गुरुकरणमसुवर्णविरचनमग्राम्यं कर्णाभरणमतीतज्योतिरालोको नोद्वेगकरः प्रजागरः।

(ख) अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

(ग) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरुपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः।

(घ) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते।

(ङ) कमलिनीसञ्चरणव्यतिकरलग्ननलिननालकण्टकक्षतेव न क्वचिन्निर्भरमाबघ्नाति पदम्।

अथवा

अधोनिर्दिष्टं विषयत्रयमाश्रित्य संस्कृतभाषया देवनागरीलिप्या च टीकां लिखतु। 5×3 = 15

(i) व्यसनम् ; (ii) लक्ष्मीमदः ; (iii) अभिचारक्रिया ; (iv) सप्तद्वीपा ; (v) वडवानलः ।

## SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) अनन्तवर्मा कः आसीत् ? कः आसीत् वसुरक्षितः ? अनन्तवर्माणं प्रति वसुरक्षितस्योपदेशाः आलोचनीयाः। 1+1+8

(ख) 'तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता' इति पाठ्यविषयमवलम्ब्य विचार्यताम्। 10

4. यथेच्छं <u>पञ्च</u> प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) दशकुमारचरितम् इति ग्रन्थः केन रचितः ? कः ग्रन्थस्यास्याधारग्रन्थः ?

(ख) कर्म कतिविधम् ? के च तद्भेदाः ?

(ग) कं पण्डितं बुधाः वदन्ति ?

(घ) 'अधीष्व तावद्दण्डनीतिम्' – कं प्रति कस्योक्तिरियम् ?

(ङ) 'महाभाग, क्लिष्टस्य मे क्रियतामार्य साहाय्यकम्' – कमुद्दिश्य केन इदमुक्तम् ?

(च) योगक्षेमौ कौ ?

(छ) 'राज्यं नाम शक्तित्रयायत्तम्' – केन एवं विचिन्तितम् ? शक्तित्रयञ्च किम् ?

5. अधोलिखितेषु विषयेषु <u>यथेच्छमेकमाश्रित्य</u> संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत। 5×1 = 5

(i) हितोपदेशः ; (ii) सुबन्धुः ; (iii) सिंहासनद्वात्रिंशिका ; (iv) अम्बिकादत्तव्यासः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——